तप्रकाशसंसर्गदज्ञानविपरीतज्ञानसंशयागोचरत्वंसाक्षिचैतन्यस्या
नावृतत्वेतत्स्वरूपभूतस्यानंदस्यापिप्रकाशपतिरितिचेतन्नदृष्टापत्तेः।आ
नंदरूपप्रकाशप्रयुक्तस्यात्मनिनिरुपाधिकप्रेम्णोदर्शनात्। भासतएवपर रामा
मप्रेमास्पदत्वलक्षणंसुखमितिविचरणाच्च।स्यादेतत्।इदानीमप्यानंदप्रका ॥३७॥
शोमुक्तिसंसारयोरविशेषप्रसंगः।ननुकल्पितभेदस्यसाक्ष्यानंदस्यप्रकाश्य

---

नवच्छिन्नस्यब्रह्मानंदस्यावृतस्यसंसारदशायामप्रकाशेनविशेषोस्तीतिचेत्।न।
आनंदेऽनवच्छिन्नांशस्यापुरुषार्थत्वात्।आनंदापरांशस्यमात्रस्यचेदानीमपिस
त्वात्।नन्ववच्छिन्नःसाक्ष्यानंदःसातिशयःसुषुप्तिसाधारणादनतिस्पष्टातनो
वैषयिकानंदेषुतिशयानुभवात्।अनवच्छिन्नोब्रह्मानंदस्तुनिरतिशा
यः।आनंदवल्यांमानुषानंदोत्तरोत्तरसातगुणोत्कर्षायवर्तनस्यब्रह्मानंदे
समाप्तेरितिचेत्।सिद्धांतेसाक्ष्यानंदविषयानंदब्रह्मानंदानांवस्तुतएकत्वेनो
त्कर्षासंभवात्।मानुषानंदादीनामुत्तरोत्तरमुत्कर्षंश्रुतिर्वदतीतिचेत्।कोवाब्रू
तेश्रुतिर्निवदतीति।किंत्वेतावदेतदुपायादनमशात्समित्युच्यते।नन्वेकस्यैव
स्फोटस्यैकस्यकरतलस्फटिकदर्पणाद्यभिव्यंजकविशेषोपधानेनाभिव्यः
क्तितारतम्यदर्शनादेकस्यैवानंदस्याभिव्यंजकसुखवृत्तिभेदोपधानेनाभि

व्यक्तितारतम्यरूपमुत्कर्षापकर्षवत्त्वंयुक्तमितिचेन्नदृष्टांतासंप्रतिपत्तेः।सर्वतः
प्रसृमरस्यसोरालोकस्यगगनविनाकरतलादिसंबंधंस्पष्टमप्रकाशमान
स्यनिम्नतलेप्रसृमरस्यजलस्येवकरतलसंबंधेनगतिप्रतिहतौबहुत्वाभा
वादधिकःप्रकाशःभास्वरदर्पणादिसंबंधेनगतिहतौबहुत्वीभावान्नहीन्नि
संबलनाच्चततोप्यधिकप्रकाशइतितत्राभिव्यंजकोपाधिर्कीभिव्यक्तितार
तम्यानुपगमात्।दृष्टांतसंप्रतिपत्तौगगनप्रसृतसोराऽलोकवदनवच्छिन्नानंद
स्यास्पृष्टताकरतलावच्छिन्नसोराऽलोकवत्सुखदृत्यवच्छिन्नानंदस्याधिका
भिव्यक्तिसंसारस्यैवाभ्युपेतव्याप्रसज्यते।एतेनसंसारदशायांप्रकाशमानोप्या
नंदोमिथ्याज्ञानतत्संस्कारविक्षिप्ततयातीव्रवापुर्विक्षिप्तप्रदीपप्रभावन्नस्पष्टप्रका
शतेमुक्तौतदभावाद्यथावदभासतइत्यपिनिरस्तंनिर्विशेषस्वरूपानंदप्रकाशमानत
त्रविक्षेपदोषादप्रकाशमानस्यमुक्त्यन्यथानुपपत्तेरतिशयस्यासंभवाद्।तस्मात्सत्यानंदस्या ॥३८॥

---

नादृतत्वकल्पनमयुक्तं।अत्राकुरुतेतविद्याचार्याःयथात्युत्कृष्टस्यैवधवलरूपस्य
मालिन्यतारतम्ययुक्तेघनेकेषुदर्पणेषुप्रतिबिंबेसत्युपाधिमालिन्यतारतम्यान्न
प्रतिबिंबेधावत्यापकर्षस्तारतम्येनाध्यस्यतेएवंवस्तुतोनिरतिशयस्यैकस्यैवस्वरूपा
नंदस्यांतःकरणप्रतिबिंबिततयासाक्षिणानंदभावेप्राक्तनसुकृतसंपत्यधीनविषय
विशेषसंपर्कोपयुक्तसत्त्वोत्कर्षापकर्षरूपमुपाधितारतम्ययुक्तसुखरूपांतःकरणा
दृत्तिप्रतिबिंबितयाविषयानंदभावेचतमोगुणरूपोपाधिमालिन्यतारतम्यदोषाद
यकर्षस्तारतम्येनाध्यस्यतेइतिसंसारदशायांप्रकाशमानेप्यानंदेध्यस्तायकर्षता
रतम्येनसातिशयत्वादतृप्तिःविद्योदयेनिरवद्यापकर्षाध्यासनिवृत्तेशशोपितस्य
तिशयत्वायापाक्रियतेतिविशेषोपपत्तेर्निनुपाधिकप्रेमगोचरतयाप्रकाशमानः
साक्षिणानंदोनादृतएवेति।अन्येतुप्रकाशमानोप्यानंदोनास्तिनप्रकाशतइत्यावर
णानुभवादादृतएवएकस्मिन्नपिसाक्षिण्यविद्याकल्पितरूपत्रैदसंभवेनचेतन्य

रूपेणानावरणस्यानंदरूपेणावरणस्यचाविरोधात्।स्वरूपप्रकाशस्यावरणा
निवर्त्तकतयाप्रकाशमानेऽप्यावरणस्याविरोधाच्च।त्वदुक्तमर्थंनजानामीति
प्रकाशमात्रएवावरणादर्शनात्।नचतत्रानाहतसामान्याकारावच्छेदेनविशे
षावरणमेवानुभूयतेइतिवाच्यं।अन्यावरणस्यान्यावच्छेदेनभानेतिप्रसंगा
त्।तत्रसामान्यविशेषभावोनियामकइतिनातिप्रसंगइतिवाच्यं।व्याप्यव्यापक
भावातिरिक्तसामान्यविशेषभावाभावेनचवह्निंनजानामीतिधूमावरकाज्ञाना
नुभवप्रसंगात्।तस्माद्यवच्छिन्नमज्ञानेप्रकाशतेतदेवाहंतमितिप्रकाशमाने
प्यज्ञानेभुज्यते।अज्ञानेचयथासास्यंशंविहायचैतन्यमावृणोतिएवमानेदमपि
तत्तत्सुखरूपवृत्तिकंस्वीकृतंविहायैवावृणोति।सएववैषयिकस्यानंदस्या
नंदावरणमिभवःसचावरणमिभवःप्रत्यूषसमयेबाह्यावरणमिभववत्कर
णविशेषप्रयुक्तवृत्तिविशेषणात्तवरतमभावेनभवति।अतःस्वरूपानंदविष ॥३९॥

---

यानंदयोर्विषयानंदानांचपरस्परभेदसिद्धिरितिवदंति।सर्वथासाक्षिचैतन्यस्या
नावृतत्वादावरणाभिभवार्थंवृत्तिमनपेक्ष्यैवतेनाहंकारादिप्रकाशनमितितुल्य
मेवानन्वेवंकथमहंकारादीनामनुसंधानं।ज्ञानेसूक्ष्मावस्थारूपस्यसंस्कारस्यता
नेसत्ययोगेननित्येनसाक्षिणातदाधानाऽसंभवात्।अत्रकेचिदाहुः।स्वसंसृष्टेन
साक्षिणासदाभास्यमानाहंकारस्तत्रघटादिविषयवृत्त्याकारपरिणतस्वावच्छि
न्नेनापिसाक्षिणाभास्यतइतितस्यानित्यत्वात्संभवतिसंस्काराधानंघटादौविष
यवृत्तौ।नहिस्वस्वाकारवृत्त्यवच्छिन्नसाक्षिणोवस्त्वगोचरसंस्काराधानमितिनिय
मोस्ति।तथासतिवृत्तिगोचरसंस्कारासंभवेनवृत्तेरस्मरणप्रसंगात्।अनवस्था
पत्त्यावृत्तिगोचरवृत्त्यंतरस्यानुव्यवसायनिरासेननिरस्तत्वात्।किंतुयावृत्त्यवच्छिन्न
चैतन्ययत्प्रकारातेतावृत्तीत्यतत्प्रकारसंस्काराधानमित्येवनियमः।एवंचज्ञानसुखा
दयोंतःकरणवृत्तयस्तत्रायंपिंडाद्युच्चरंतोविस्फुलिंगाःस्वावच्छिन्नवह्निनेवस्वस्मां

वच्छिन्नेनानित्येनसाक्षिणाभास्यंतइतियुक्तंतेष्वपिसंस्काराधानं।यस्यघटेका
काकारधीस्तावद्घटमेवावभासयेत्।घटस्पर्शेततोब्रह्मचैतन्येनावभास्यतइति
कूटस्थदीपोक्तोविषयविशेषणस्यज्ञानस्यविषयावच्छिन्नब्रह्मचैतन्यावभास्य
त्वेपक्षःयश्चतत्वंपदीपिकोक्तोज्ञानेच्छादीनामनवच्छिन्नशुद्धचैतन्यरूपनित्यसा
क्षिभास्यत्वपक्षस्तयोरपिचैतन्यस्यस्वसंसृष्टापरोक्षरूपत्वाद्वृत्तिसंसर्गेविशेष्यं वाच्य
इतितत्संसृष्टनित्यरूपसाक्षावान्नतेषुसंस्काराधानेकाचिदनुपपत्तिरितिअन्ये
सुषुप्तावविद्यानुसंधानसिद्ध्यैकल्पितामविद्यावृत्तिमहमाकारामंगीकृत्याह
मर्थसंस्कारमुपपादयंति।नचास्मिन्पक्षेएतावंतंकालमिदमहंपश्यन्नेवासमि
त्यन्यज्ञानधाराकालीनाहमर्थानुसंधानानुपपत्तिःअवच्छेदभेदेनसुखदुःखयोग
पद्यवदितिह्ययोगपद्यस्याप्यविरोधेनान्यज्ञानधाराकालेप्यहमाकाराविद्यावृ
त्तिसंतानसंभवादिति।अपरेत्वहमाकारावृत्तिरंतःकरणवृत्तिरेवकिंतूपासनादि

राम
॥४०॥

वृत्तिवन्नज्ञानंकृतंतत्कारणजन्यत्वात्।नहितत्रचक्षुरादिप्रत्यक्षकारणंसंभ
वतिनवालिंगादिकंलिंगादिप्रतिसंधानशून्यस्याप्यहंकारानुसंधानदर्शना
।नापिमनःकरणंतत्सोपादानभूतस्यक्वचिदपिकरणत्वाक्लृप्तेःतत्रेहम
र्थप्रत्यभिज्ञापिज्ञानंनस्यादितिचेत्।नतस्याअहमंशेज्ञानत्वाभावेपितत्रां
शेस्मृतिकरणत्वेनकृप्तसंस्कारजन्यतयाज्ञानत्वात्।अंशभेदेनज्ञानपरो
क्षत्वापरोक्षत्ववत्प्रमात्वाप्रमात्ववच्चज्ञानत्वयोरपिअविरोधादित्याहुः॥इतरे
त्वहमाकारापिवृत्तिर्ज्ञानमेवमामहंजानामीत्यनुभवात्।नचकरणासंभवःअ
नुभवानुसारेसामनसएवांतरिंद्रियस्यकरणत्वस्यापिकल्पनादित्याहुः॥एव
मतिवाह्यविषयापरोक्षवृत्तीनामेवावरणाभिभावकत्वनियमःपर्यवस्यन्।न
चुनानापमपिनियमःशुक्तिरजतस्यतेइदमाकारवृत्तेरज्ञानाभिभावकत्वा

त्र्यंश्यघोपादानाभावेनरजतोत्पत्त्ययोगादितिचेत्। अत्राहुः इदमाकारवृत्त्येद
मंशज्ञाननिवृत्तावपिशुक्तित्वादिविशेषांशज्ञाननिवृत्तेस्तदेवरजतोपादा
नंशुक्तित्वाद्यज्ञानेरजताध्यासस्यतन्नीनेतदभावस्यानुभूयमानत्वात्। अध्यासभा
ष्यटीकाविवरणेऽनुभूयमानान्वयव्यतिरेकस्यैवाज्ञानस्यरजताद्यध्यासोपादान
लोकैः। अतएवशुक्त्यंशाधिष्ठानेइदमंशाधारःसविज्ञासाज्ञानविषयोधिष्ठा
नमतद्रूपोपितद्रूपेणारोप्यबुद्धौस्फुरन्नाधारइतिसंक्षेपशारीरकेविवेचनादि
ति। अपरेत्विदंरजतमितिइदमंशाभिन्नत्वेनप्रतीयमानस्यरजतस्यइदमंशज्ञा
नेवोपादानं। तस्यचेदमाकारवृत्त्यावरणशक्तिमात्रनिवृत्तावपिविक्षेपशक्त्यास
हृतदनुवृत्तेर्नोपादानत्वासंभवःजलप्रतिबिंबितवृक्षाधोग्रत्वाध्यासेजीवन्मुक्तानु
वृत्तप्रपंचाध्यासेचसर्वात्मनाधिष्ठानसाक्षात्कारानंतरभाविन्यावरणनिवृत्तावपि
विक्षेपशक्तिसहिताज्ञानमात्रस्योपादानत्वसंप्रतिपत्तेरित्याहुः। कवितार्किकचक्र

॥४१॥

रा म

---

वर्त्तिन्हिसिंहभदोपाध्यापास्त्विदंरजतमितिभ्रमरूपवृत्तिव्यतिरेकेणरजतोत्पत्तेः प्रा
गिदमाकारावृत्तिरेवनास्तीतितस्याअज्ञाननिवर्त्तकत्वसदसद्भावविचारंनिरासं
बनमन्यते। तथाहिनतावद्भ्रमरूपवृत्तिव्यतिरेकेणेदमकारावृत्तिरनुभवसिद्धाज्ञा
ज्ञानहित्वाननुभवात्। नाःप्यधिष्ठानसामान्यज्ञानमध्यासकारणमितिकार्यक
ल्प्या। तस्यतत्कारणत्वेमानाभावात्। नचाधिष्ठानसंप्रयोगाभावेरजताद्युत्पत्ति
स्तत्रमानं। ततोदृष्टेंद्रियसंप्रयोगस्यैवाध्यासकारणत्वप्राप्तेः। नचसंप्रयोगोनसर्व
भ्रमव्यापीअधिष्ठानस्फुरणंतुस्वतःत्रकाशमानेप्रत्यगात्मन्यहंकाराद्यध्यासम
पिव्याप्नोतीतिवाच्यं। तस्यापिघटाद्यध्यासाव्यापित्वात्। घटादिप्रत्यक्षात्प्राक्तदधि
ष्ठानस्फूर्त्तेरूपत्रह्ममात्रगोचरत्वासुषुप्त्यसंभवात्। स्वरूपप्रकाशस्यचावृत्त
त्वात्। आवृतानावृतसाधारणेनाधिष्ठानप्रकाशमात्रस्याध्यासकारणत्वेशुक्ती

दमंशसंसर्गयोगात्प्रागपितदवच्छिन्नचैतन्यरूपप्रकाशस्याहृतस्पसङ्गविनतदाप्य
ध्यासापत्तेः।नचाध्यासस्सामान्येधिष्ठानप्रकाशस्सामान्यहेतुःप्रतिभाकाध्यासे
मिव्यक्ताधिष्ठानप्रकाशइतिनातिप्रसंगःसामान्येसामोन्यस्यविसेषेविषस्य
हेतुत्वोवित्यादितिवाच्यंएवमपिप्रातिभासिकशंखपीतिमकूपजलनेत्याध्या
सव्यापनात्।रूपानुपहितचक्षुषप्रत्ययायोगेनतदानीशंखादिगतशौक्ल्यायसं
भावेनचाध्यासात्प्राक्शंखादिरूपाधिष्ठानगोचरत्वसंभवात्।नचप्रातिभा
सिकेधपिरजताध्यासमात्रेनिरूक्तोविशेषहेतुरस्तिमितिवाच्यंतथासतिसप्र
योगात्प्राक्प्रतीतराख्याद्यध्यासाप्रसंगायतदध्यासेसंप्रयोगःकारणमित्यवश्यवक्त
व्यतपातस्यैवसामान्यतःप्रतिभासिकाध्यासमात्रेलाघवात्कारणत्वसिद्धौतत राम
एवरजताध्यासकादाचित्कत्वस्यापिनिर्वाहादधिष्ठानप्रकाशस्यसामान्यतो ॥४२॥
विशेषतोवाध्यासकारणत्वस्यासिद्धेःननुसादृश्यनिश्चयेऽध्यासांतरंकार

---

णत्वेपितत्सापेक्षोरजताद्यध्यासेरजतादिसादृश्यभूतरूपविशेषादिविशिष्ट
धर्मिज्ञानरूपमधिष्ठानसामान्यज्ञानेकारणमवश्यंवाच्यंदुष्टेंद्रियसंप्रयोग
मात्रस्यकारणत्वेशुक्तिवदिंगालेपिरजताध्यासप्रसंगाद्।नचसादृश्यम
पिविषयदोषत्वेनकारणमितिवाच्यंविसदृसेपिसादृश्यभ्रमेसत्यध्यास
सङ्गावात्।जलधिसलिलस्नेहरेनीलशिलाद्याशेषदर्शनात्।नचतद्धे
तोरेवेतिन्यायात्सादृश्यज्ञानसामग्र्येवाध्यासकारणमस्त्विनियुक्तंज्ञानसम
ग्र्यासमर्थकारणत्वस्यक्वचिदप्यदृष्टेःततःसादृश्यज्ञानत्वस्यलघुत्वाच्चनचस्वतस्तु
भ्रमेपिशुभ्रकजघोतमृंगारगतंस्वच्छेजलएवनेत्याध्यासःननुमुक्ताफलइतिव्यवस्था
वद्वस्तुस्वभावादेवशुक्तौरजताध्यासोनेगालादावितिव्यवस्यानतुसादृश्यज्ञानापेक्ष
णादितिवाच्यंस्वतःपटखंडेपुंडरीकमुकुलत्वानध्यासेतत्रैवकर्त्रनादिघटि
ततदाकारेतदध्यासदर्शनेनतदध्यासस्यवस्तुस्वभावमननुरूप्यसादृश्यज्ञान

भावाभावानुविधायित्वनिश्चयात्। अन्यथान्यदापितत्रतदध्यासप्रसंगात्। उच्य
ते। सादृश्यज्ञानस्याध्यासकारणत्ववादे विशेषदर्शनप्रतिबंध्येषुरजताद्यध्या
सेष्वतत्स्वकारणत्वंवाच्यं। नतुतदप्रतिबंध्येषपीतशंखाद्यध्यासेषु असंभवा
त्। विशेषदर्शनप्रतिबंध्येषुचप्रतिबंधकज्ञानसामग्र्याः प्रतिबंधकत्वनियमे
नविशेषदर्शनसामग्र्यवश्यंप्रतिबंधिकावाच्येतितत्तएवसर्वव्यवस्थोपपत्तेः
किंसादृश्यज्ञानस्यकारणत्वकल्पनया। तथाहि दूरंगात्वादोचक्षुःसंप्रयुक्तेतदी
पनेत्यादिरूपविशेषदर्शनसामग्रीसत्वान्नरजताध्यासःशुक्त्यादावपितीव्र
भागादिव्यापिचक्षुःसंप्रयोगेतत्सत्वान्नतदध्यासःसदृशभागमात्रसंप्रयोगेतद
भावादध्यासःतदापिशुक्तित्वरूपविशेषदर्शनसामग्रीसत्वादनध्यासप्रसंग
इतिचेत्। नअध्याससमयेशुक्तित्वदर्शनाभावेनतत्पूर्वंतत्सामग्र्यभावस्यत्वयापि रान
वाच्यत्वात्। ममसादृश्यज्ञानरूपाध्यासकारणदोषेणाप्रतिबंधात्तदाशुक्तित्वदर्शन ॥४३॥

सामग्र्यभावाभ्युपगमस्तवतथाभ्युपगमेतुद्यदकुटीप्रभातदृष्टांतेइतिचेत्। नासमीपोप
सर्पणानंतरंरजतसादृश्यरूपेचाकचिक्येदृश्यमानएवशुक्तित्वोपलंभेनतस्यत
त्सामग्रीप्रतिबंधकत्वासिद्धेर्दूरत्वादिदोषेणाप्रतिबंधद्व्यंजकनीलत्वादि
ग्राहकासमवधानाद्वातत्सामग्र्यभावस्यवक्तुंशक्यत्वात्। एवंजलधिजलेनियत
नीलेरूपाध्यासप्रयोजकदोषेणादूरेव्यंजकतरंगादियाहकासमवधानेनच
शीतस्पर्शजलसंशित्वादिविशेषदर्शनसामग्र्यभावाच्छिलातलत्वाद्यध्यासःविस्तृते
पटेपरिणाहरूपविशेषदर्शनसामग्रीसत्वान्नपुंडरीकमुकुलत्वाध्यासःकर्त
नादिघटिततदाकारेतदभावान्नदध्यासइति॥ननुवंकरस्थेलोहराकलेतदी
पनीलरूपविशेषदर्शनसामग्र्यभावाद्रजताध्यासःकिंनभवेत्सादृश्यज्ञानान
पेक्षणादितिचेत्। भवत्येवकिंतुतात्रादिव्यावर्त्तकविशेषदर्शनसामग्र्याःसत्वा
द्वान्नदध्यासेनापिभाव्यमितिक्वचिदनेकाध्यासेसंशयगोचरोभवतिक्वचित्तुरज

तप्रायेकोशग्रहादौरजताध्यासःस्वभवतिक्वचित्सत्यपिसादृश्यज्ञानेशुक्तिकादौ
कदाचित्करणादोषाद्यभावेनंध्यासानुदयवदध्यासानुदयेपिनहानिःतस्मान्न
कार्यकल्पेदमाकारवृत्तिर्नाप्यप्रतिबध्यदमर्थसंप्रयोगकारणकल्पा।।ततोभवं
त्याएवंदृष्टेर्दुष्टेंद्रियसंप्रयोगासुमितविद्यापरिणामस्वसमानकालरजतविषय
त्वस्याप्यस्मासिरूच्यमानत्वात्तत्रचज्ञानसमानकालोत्पत्तिकेप्रतिभासमात्रवि
परिवर्त्तिनिरजतेतत्प्राचीनंसंप्रयोगाभावेप्पितत्तदाश्रयेदमर्थसंप्रयोगादेव
तस्यापिचक्षुर्योग्यत्वोपपत्तेश्चक्षुषारजतंपरयामीतिप्रतिभासिकरजतस्यसंप्र
योगाभावेप्पिचाक्षुषत्वानुभवात्तत्रचक्षुसंप्रयोगाभावादेवबाधकान्नतच्चाक्षुषंना
पिदुष्टेंद्रियसंप्रयोगजन्यमिदंवृत्तिसमकालंज्ञानकारणस्येंद्रियसंप्रयोगस्या
र्थकारणत्वाच्छुक्तेःकिंत्विदंवृत्त्यनेतरभावितज्ञन्यंतदभिव्यक्तेःसाक्षिण्यध्यासात्त राम
ज्ञास्यंचाक्षुषत्वानुभवस्वभासकचैतन्याभिव्यंजकेदंवृत्तिजनेकत्वेनपरंपरया ॥४४॥

चक्षुरपेक्षामात्रेणेतिवाच्यं।तथासतिपीतशंखभ्रमेचक्षुरनपेक्षाप्रसंगात्।नहि
तत्रशंखग्रहणेचक्षुरपेक्षास्तिविनाकेवलशंखस्यचक्षुर्योग्यत्वाभोगात्।नापि
पीतिमग्रहणेआरोप्येंद्रियकत्वानभ्युपगमात्।नचपीतिमास्वरूपतोनाध्यस्य
तेकिंतुनयनगतपित्तपीतिमोनुभूयमानस्पशंखसंसर्गमात्रमध्यस्यतइतिपीति
मानुभावार्थमेवचक्षुरपेक्षेतिवाच्यं।।तथासतिशंखतत्संसर्गयोरप्रत्यक्षत्वप्रसं
गात्।नयनप्रदेशगतपित्तपीतिमाकारवृत्त्यभिव्यक्तसाक्ष्यसंसर्गेणतयोस्तद्ग्रा
ह्यत्वाभावात्।पीतिमसंसृष्टशंखगोचरैकवृत्त्यनभ्युपगमाच्चान्यनयनप्रदेश
स्थस्यपित्तपीतिमोदोषाद्यंशेसंसर्गाध्यासोनोपेयतेकिंतुनयनरश्मिनिःस
हतिर्गतस्यविषयव्यापिनस्तत्संसर्गाध्यासःकुसुंभानुरिक्तइवकौसुंभ
इतिसंभवतितदाकारवृत्त्यभिव्यक्तसाक्षिसंसर्गइतिवाच्यं।तथासतिसुवर्णजि
ह्मश्चपित्तोपहतनयनेनवीक्ष्यमाणेशंखेतदितरेषांपीतिमधीप्रसंगात्तस्य

सपीतिमासमीयेगृहीतएवदूरेग्रहीतुंशक्यःविहायस्युपर्युत्पतन्विहंगमइवइत
रेषांचसमीपेनग्रहणमितिवाच्यं।इतरेषामपित्वक्चक्षुर्न्निकटन्यस्तचक्षुषांपी
तिमीप्सत्वेनतद्ग्रहेणास्पदुर्ग्रहत्वात्।एवमप्यतिघवलसिकतामयतप्तत्रपह
दछनदीजलजैत्याध्यासेरक्तवस्त्रेषुनिशिचंद्रिकायांनैत्याध्यासेचानुभूयमा
नाशेयस्यवक्तुमशक्यत्वेनतत्रनैत्यसंसृष्टाधिष्ठानगोचरश्चासुषत्वेनभ्यु
पगमेनचक्षुरनुपयोगास्पदुःपरिहरत्वाच्च।अनास्वादितनिक्तरसस्यवास्य
मधुरेतिक्तताभासोजन्मांतरानुभवसंस्कारहेतुकइतिप्रतिपादयतापेचयादि
कायंथेनस्वरूपतोध्यस्यमानस्यैवतिक्तरसस्यैंद्रियकत्वस्फुटिकरणाच्च।अ
न्यथातत्रस्वनव्यापारापेक्षानुपपत्तेः।तस्मादुदाहरनैत्याध्यासस्यैवाधिष्ठा
नसंप्रयोगादेवतत्रैत्यरसाध्यासइति ॥४५॥

तस्यचासुषत्वमभ्युपगंतव्यंरूपंविनाकेवलाधिष्ठानविषयत्वासंभवात्।
अधिष्ठानगोचरत्वंचविषचैतन्याभिव्यक्तस्वभावेनजलतदध्यस्तनैत्या
दीनांतद्धास्पत्वायोगात्।तिक्तरसाध्यासस्यैत्वधिष्ठानाध्यासपोरेंद्रियया
ह्यत्वाभावात्त्वगिंद्रियजन्याधिष्ठानगोचरत्वंदूरस्थचैतन्याभिव्यक्तौ।पित्ता
पहतरसनसंप्रयोगादेवतत्रतिक्तरसाध्यासस्तन्मात्रविषयरसानवृत्तिश्चा
समकालमुदेतीतितिक्तरसस्पर्शासनेत्वमभ्युपंगतव्यं।त्वगिंद्रियजन्याधिष्ठानगो
चरत्वंचाभिव्यक्तचैतन्यभास्यैतिक्तरसेपरंपरापिरसनोपयोगाभावेनतत्र
कथमपित्रकारांतरेणरसनत्वानुभवसमर्थनासंभवात्।तथैवरजतस्यापि
चासुषत्वोपपत्तेःपर्यंमीत्यनुभवोनबाधनीयश्चनचासंप्रयुक्तस्यरजतस्यचा
क्षुषत्वप्रत्यक्षमात्रेविषयेंद्रियसंनिकर्षःकारणंद्रव्यप्रत्यक्षेतत्संयोगःकारणं

BHAU DAJI INSTITUTE OF INDOLOGY

रजतप्रत्यक्षे रजतसंयोगः कारणमितिगृहीतानेक कार्यकारणनियमभंगः स्यादितिवाच्यं सन्निकर्षत्वस्यसंयोगाद्यनुगतस्यैकस्याभावेनाद्यनियमासिद्धेः। द्वितीयनियमस्यनैपायिकरीत्यातमसीवसंयोगायोग्येक्वचिदद्रव्यपि द्रव्यत्वाध्याससंभवाद्व्यवहारदृष्ट्यायद्रव्यत्वाधिकरणंतद्विषयत्वेनप्रतिभासिकरजतेद्रव्यत्वस्याधिष्ठानगतस्यैवेदंत्वदध्यासात्प्रतीत्यभ्युपगमेन च द्वितीयनियमाविरोधात्। द्वितीयनियमरूपसामान्यकार्यकारणभावातिरेकेणविशिष्यापिकार्यकारणभावकल्पनापागौरवपराहतत्वेनतृतीयनियमासिद्धेः। यत्सामान्येयत्सामान्यंहेतुस्तद्विशेषेतद्विशेषोहेतुरितिन्यायस्यापियत्रबीजांकुरादौसामान्यकार्यकारणभावाभ्युपगमेबीजातेशदंकुरांतरोत्पत्यादिप्रसंगः। द्विषयत्वेनततोऽनागतस्यनायमानविशेषकार्यकारणभावासिद्धेः। नचाऽत्रापिद्रव्यप्रत्यक्षेसंयोगः कारणमितिसामान्यनियममात्रोयंगमेऽ ॥४६॥

---

न्यसंयोगाद्द्रव्यप्रत्यक्षापत्तिरितिप्रसंगोऽस्तीतिवाच्यं तद्द्रव्यप्रत्यक्षेनद्रव्यसंयोगः कारणमितिनियमाभ्युपगमात्। अन्यथातृतीयनीयमेप्यतिप्रसंगस्यदुर्वारत्वात्ततस्मान्नास्तिकश्चिन्नियमभंगः। किंचात्रक्वचिन्नियमभंगेपिनदोषः। इदंजलंपरयामिनाजलंपश्यामीत्यादेरन्यथासिद्धस्यानुभवस्यसत्वात् प्रथमगृहीतानामपित्रत्यक्षमात्रेविषयसन्निकर्षः कारणमित्यादिनियमानांव्यावहारिकविषयेसंकोचकल्पनमंतरेणोपपादनासंभवात्। नचैवंसतिप्रमायांसन्निकर्षः कारणानभ्रमइतिसंकोचकल्पनासंभवादसंनिकृष्टस्यैवदशांतरस्थस्यैवरजतस्यैहारोपापत्तिरित्यन्यथाख्यातिपादप्रसारिकाऽभिव्यक्तचैतन्यावगुंठनरूपस्यदेशांतरस्थरजतस्यापरोक्ष्यानुपपत्तेःस्मृतिबाधानुपपत्यादिभिर्भ्रमविषयस्यानिर्वचनीयत्वसिद्धश्च। नचाधिष्ठानसं

प्रयोगमात्रात्प्रातिभासिकस्येंद्रियकत्वोपगमेशुक्तिरजताध्याससमयेतत्रैवे
कालांतरेध्यस्तनीयस्परंगस्यापिचाक्षुषत्वंकुतोनस्यादितिवाच्यं।रजताध्यास
समयरंगरजतसाधारणाचाक्चिक्यादर्शनाविशेषेपियतोरागादिरूपपुरु
षदोषाभावादितस्तदानरंगाध्यासस्तएवमयातद्विषयवृत्त्यनुदयस्याप्यु
पगमात्तस्मादिदमंशस्यमिथ्यारजतगोचरएकैववृत्तिरिंद्रियजन्यानततः
प्रागिदमाकारवृत्तिरितिनात्रैवेयमज्ञाननिवर्तकत्वसदसद्भावचिंताकार्येति।अन्येत्वधिष्ठानज्ञानमध्यासकारणमितीदमाकारांवृत्तिमुपेत्यतदभि
व्यक्तेनैवसाक्षिणातद्ध्यस्तरजतस्यावभासंमन्यातद्भासकसाक्ष्यभिव्यंजिक
पातयैवेदंवृत्यारजतविषयसंस्काधानोपपत्तेश्चरजताकारवृत्तिर्व्यर्थेतिमन्यंते।
ज्ञानदयपक्षेइदमित्येकावृत्तिरध्यासकारणमृताइदंरजतमितिद्वितीयावृत्ति रामा
रध्यस्तरजतविषया।नत्विदमंशविनाध्यस्तमात्रगोचरा।इदंजानामीतितस्यादे ॥४७॥

र्थतात्पर्यात्रजतविषयत्वानुभवादितिकेचित्।अन्येतुपथेदमंशावच्छिन्न
चैतन्यस्याविद्यारजताकारेणविवर्त्ततेएवमिदमंशविषयवृत्तिज्ञानाक्षि
चैतन्यरूपाःविद्यारजतज्ञानाभासाकारेणविवर्त्ततेनत्विदमशवृत्तिवदन
ध्यस्तंरजतज्ञानमस्तितद्यावरजतस्याधिष्ठानगतेदंत्वसंसर्गभानवत्तज्ज्ञान
स्यप्यधिष्ठानगतेदंविषयत्वसंसर्गभानोपपत्तेर्नतुस्यापीदंविषयत्वमभ्युप
गंतव्यं।।नचरजतत्ववदध्यस्तस्यरजतेदंत्वसंसर्गस्यरजतज्ञानगोचरत्वात
व्यतियोगिनइदंत्वस्यापितद्विषयत्वंवक्तव्यमितिवाच्यं।स्वतादात्म्याश्रयस्येदं
त्वविषयत्वादेवतस्यतत्संसर्गविषयत्वेतिप्रसंगाभावान्नचाधिष्ठानाध्यासपारंपर्य
स्मिन्नज्ञानेप्रकाशनियमस्यसंभवनाभाष्यविवरणेप्रतिपादनादेववृत्तिविषय
त्वंवक्तव्यमितियाच्यं।वृत्तिनेदंपीदमाकारवृत्त्यभिव्यक्तेएकस्मिन्नसाक्षिणित
योःप्रकाशोपगमादित्यादुः।ननुसर्वपदार्थानांसाक्षिप्रसादादेवनुवृत्तिप्रसंगात्।

तस्मात्प्रत्यक्षगाद्येमिव्यक्तापरोक्षैकरसचैतन्यावगुंठनात्स्पष्टताजिज्ञासानिवर्त्त
नक्षमाशङ्कादिगोप्यतदभावादस्पष्टतेतिव्यवस्थाऽभ्युपगंतव्याऽन्यतरथासाक्षिवेद्य
स्यसुखादेःस्पष्टताशङ्कवृत्तिवेद्यस्यापिब्रह्मणोमननादेःप्रागज्ञानानिवृत्तावस्प
ष्टतातदनंतरंतन्निवृत्तौस्पष्टतेतिवृत्तिनिर्गममुपपादयतिनन्वेतावताविषयावरकाज्ञान
निवृत्त्यर्थंवृत्तिनिर्गमउक्तः।तदयुक्तंविषयावच्छिन्नचैतन्यगतस्यतदावरकाज्ञानस्यानिर्गतवृत्यानिवृत्युपगमेप्यनतिप्रसंगात्।नच
तयासतिदेवदत्तीयघटज्ञानेनपरदत्तीयघटाज्ञानस्यापिनिवृत्तिप्रसंगःसमा
नविषयत्वस्यसत्वात्।अत्रमर्थविषयचैतन्यनिष्ठयोर्ज्ञानाज्ञानयोर्भिन्नाश्रयते
नतयोर्विरोधेसमानाश्रयत्वस्यातंत्रत्वादितिवाच्यंसमानाश्रयविषयत्वंज्ञा
नाज्ञानयोर्विरोधप्रयोजकमंगीकृत्यवृत्तिनिर्गमाभ्युपगमेपिदेवदत्तीयघटवृत्तेये
र्यज्ञदत्तीयघटाज्ञानस्यचघटावच्छिन्नचैतन्येकाश्रयत्वप्रयुक्तातिप्रसंगतादव

रान
॥४८॥

---

स्थेनपरदत्तीयंपुरुषंप्रतियद्विषयावरकंतत्परदत्तीयघटविषयकज्ञाननिवर्त्यमिति
दृष्टयेवविरोधप्रयोजकस्यवक्तव्यतयासमानाश्रयत्वस्यानपेक्षणान्नाश्र
याद्वृत्तिनिर्गमानुपगमेज्ञानाज्ञानयोर्विरोधप्रयोजकमेवदुर्निरूपंयद
ज्ञानंयंपुरुषंप्रतीत्याद्युक्तमितिचेत्।नपरोक्षज्ञानेनापिविषयगताज्ञाननिवृत्ति
प्रसंगात्।अपरोक्षत्वमपिनिवर्त्तकज्ञानविशेषणमितिचेत्किंतदपरोक्षत्वंनता
वज्जातिःदंड्यमासादितिसंस्कारोपनीतदंडविशिष्टपुरुषविषयस्यचाक्षुषज्ञा
नस्यदंडांशेपितत्सत्वेतत्रापिविषयगताज्ञाननिवृत्त्यापातात्।दंडंसाक्षात्करोमी
तितदंशेप्यापरोक्ष्यानुभावापत्तेश्च।अननुभवेपिसंस्कारंसंनिकर्षयरेकल्प्येदि
यसन्निकर्षजन्यतयातत्रकल्पनिकापरोक्ष्योपगमेऽनुमित्यादावपिलिंगज्ञानादि
कंपरिकल्प्यतदंगीकारापत्तेःदंडांशेप्यापरोक्ष्यासत्वेतुतस्यजातित्वायोगात्जातेर्व्य
क्तवृत्तित्वनियमात्।तदनियमेप्यनुवृत्तिप्रसंगात्।तस्मात्प्रत्यक्षगाद्येमिव्यक्तापर

रोक्षैकरसचैतन्यावगुंटनात्स्पष्टताजिज्ञासानिवृत्तिनक्षमाशब्दादिगम्यतदभा
वादस्पष्टेतिव्यवस्थाऽभ्युपगंतव्याऽतएवसाक्षित्वेघस्यसुखादेःस्पष्टताश्रद्
धत्तिवेद्यस्यापिब्रह्मणोमननादेः प्रागज्ञानानिवृत्तावस्पष्टतातनंतरंतन्निवृत्तौ
स्पष्टतोत्तिवृत्तिनिर्गमम्युपपादयंति।नचेतादृताविषयावरकाज्ञाननिवृत्य
र्थंवृत्तिनिर्गमइत्युक्तंतदयुक्तं विषयावच्छिन्नचैतन्यगतस्यतदावरकाज्ञान
स्यानिगतवृत्त्यानिवृत्त्युपगमेप्यनतिप्रसंगात्।नचतथासतिदेवदत्तापद्यट
ज्ञानेनयज्ञदत्तीयघटज्ञानस्यापिनिवृत्तिप्रसंगःसमानविषयत्वस्यसत्वात्
अहमर्थविषयचैतन्यनिष्ठयोर्ज्ञानाज्ञानयोर्भिन्नाश्रयत्वेनतयोर्विरोधेस
मानाश्रयत्वस्यातंत्रत्वादितिवाच्यं।समानाश्रयविषयत्वंज्ञानाज्ञानयोर्विरोध
प्रयोजकमंगीकृत्यवृत्तिनिर्गमाभ्युपगमेपिदेवदत्तायघटवृत्तेर्यज्ञदत्तायघ राम
ज्ञानस्यचघटावच्छिन्नचैतन्यैकाश्रयत्वप्राप्तिप्रसंगतादवस्थ्यंनयदज्ञानं ॥४९॥

---

यंपुरुषंप्रतियद्विषयावरकंतत्तदीयतद्विषयकज्ञाननिवर्त्यमितिष्ठयोव
विरोधप्रयोजकस्यवक्तव्यतयासमानाश्रयत्वस्यानपेक्षणान्नाश्रयभे
दवृत्तिनिर्गमानुपगमेज्ञानाज्ञानयोर्विरोधप्रयोजकमेवदुर्निरूपं।यदज्ञा
नंयंपुरुषंप्रतीत्याद्युक्तमितिचेत्।नपरोक्षज्ञानेनामिविषयगताज्ञाननि
वृत्तिप्रसंगात्।अपरोक्षत्वमपिनिवर्त्यकज्ञानविशेषणमितिचेत्किंतद
परोक्षत्वंनतावज्ज्ञातिःदंड्यपमासादितिसंस्कारोपनीतदंडेविशिष्टपुरुष
विषयस्यचाक्षुषज्ञानस्यदंडांशेपितत्सत्वेतन्नापिविषयगताज्ञाननिवृत्या
पातात्।दंडंसाक्षात्करोमीतितदंशेप्यपरोक्षानुभवापत्तेश्चनानुभवेपि
संस्कारंसंनिकर्षंपरिकल्प्येंद्रियसन्निकर्षजन्यतयातन्नकाल्पनिकापरोक्षो
पगमेऽनुमित्यादावपिलिंगज्ञानादिकंपरिकल्प्यतदंगीकारापत्तेर्दंडांशे
अपरोक्षत्वासंभवेनुतस्यज्ञातित्वायोगात्।ज्ञातेर्व्याप्यवृत्तित्वनियमात्।तदनियमे

प्यवच्छेदकोपाधिभेदानिरूपणेनतस्याव्याप्यवृत्तिजातित्वायोगाच्च। नाप्यु
पाधिस्तदनिर्वचनात्। इंद्रियजन्यत्वमितिचेत्। नासिद्धत्वस्याव्यापनात्।
अनुमितिशाब्दज्ञानोपनीतरूपत्वादिविशिष्टघटप्रत्यक्षविशेषणांशातिव्या
पनाच्चाकारणांतरभावेनतदंशेपरोक्षेपुपनयसहकारिसामर्थ्यादिंद्रिय
स्यैवजननकल्पनादनुगतजन्यतावच्छेदकायहणानेकेंद्रियजन्यत्वस्यदु
र्ग्रहत्वाच्च। तद्धेतुस्यैवप्रतीतस्यापरोक्ष्यरूपत्वापपत्तौप्रत्यक्षाद्भेदव्यवायप्य
स्येंद्रियजन्यत्वस्यतद्योग्यापरोक्ष्यरूपत्वकल्पनायोगात्। एतेनसन्निकर्षज
न्यत्वमापरोक्ष्यमुपनयसहकृतेंद्रियजन्यपरोक्षांशेचनसन्निकर्षजन्यत्व
मनुमितावप्युपनीतमानसत्वेनप्रमाणांतरसाधारण्योपनयस्यासन्नि
कर्षत्वादित्यपिशंकानिरस्तासंयोगादिसन्निकर्षाणामननुगमेनाननुगमा
च्च। पत्नवाभिमतमापरोक्ष्यंतदेवमप्यस्तिचेत्। नातस्यशाब्दापरोक्षज्ञा



---

रूपणाघस्तावेप्रतिपादनीयस्तत्रेवदर्शनीययुक्त्याज्ञाननिवृत्तिप्रयोज्य
त्वेनतन्निवृत्तिप्रयोजकविशेषणाभावायोगात्। तस्मात्तत्त्वमसीतिशोकमात्मविदि
तिश्रुतस्यब्रह्मज्ञानस्यसूत्राज्ञानाश्रयभूतसर्वोपादानब्रह्मसंसर्गनियतस्य
सूत्राज्ञाननिवर्तकत्वादैंद्रियकत्वंतस्यतद्विंद्रियसंनिकर्षसामर्थ्यात्तत्त
द्विषयावच्छिन्नचैतन्यसंसर्गएवोत्पद्यंतइतिनियममभ्युपेत्याज्ञानाश्रयचै
तन्यसंसर्गनियतत्वंनिवर्तकज्ञानविशेषणावाच्यंतथाचयदज्ञातंयंपुरु
षंप्रतिपद्विषयावरकंतत्तद्दीयतद्विषयतदज्ञानाश्रयचैतन्यसंसर्गनियता
त्मलाभज्ञाननिवर्त्यमितिज्ञानाज्ञानयोर्विरोधप्रयोजकंनिरूपितंभवतिनचैव
सतिनाडीहृयस्वरूपगोचरशाब्दज्ञानस्याप्यज्ञाननिवर्तकत्वप्रसंगःतस्यकदा
चिदर्थवशात्संपन्ननाडीहृद्यानन्यतरवस्तुसंसर्गसंभवेपिविषयसंसर्गविना
पिशाब्दज्ञानसंभवेनतत्संसर्गनियतात्मलाभत्वात्। तस्माज्ज्ञानाज्ञानविरोध

निर्वाहायेतिनिर्गमोवक्तव्यइति।अन्येतुविषयगताज्ञानस्यसाधकतमत्वसमाना धिकरणाज्ञाननिवर्त्तकत्वसिद्धेरितिनिर्गमःफलतीत्याहुः।अपरेतुबाध्यप्रकाशस्यब्राह्यतमानिवर्त्तकत्वंसामानाधिकरण्येसत्यवृष्टमितिदृष्टानुरोधादितिनिर्गमःसिध्यकेचित्त्वावरणाभिभवार्थइतिनिर्गमानपेक्षायामपिचिदुपरागार्थंप्रमात्रैतन्यस्यविषयप्रकाशकब्रह्मचैतन्याभेदाभिव्यक्त्यर्थंवातदपेक्षत्वाहुः।अथकिंप्रमाणकोयंजीवब्रह्मणोरभेदःयोरत्याभिव्यज्येतावेदांतप्रमाणकइतिघटाद्योषःसर्वेपिवेदांताउपक्रमोपसंहारैकरूप्यादितात्पर्यादिलिंगैर्विमृश्यमानाःप्रत्यगभिन्नेब्रह्मण्येतात्पर्येसमन्वयंतिायथाचापमर्थस्यायाणस्त्रिएवसमन्वयाध्यायेप्रपंचितंविस्तरभयान्नेहप्रदर्श्यते॥इतिशास्त्रसिद्धांतलेशसंग्रहेप्रथमःपरिछेदःसमाप्तः॥अथकथमद्वितायेब्रह्मणिवेदांतानांसमन्वयःप्रत्यक्षादिविरोधादितिचेन्न।आरंभणाधिकरणोदाहृतश्रुतिषु ॥५१॥ राम

---

क्तिभिःप्रपंचस्यमिथ्यात्वंप्रत्यायपितुशक्यतेघटःसन्नित्यादिघटादिसत्तयाहिप्रत्यक्षादिविरोधात्।अत्राकुस्तत्सृष्टिकारादयःनप्रत्यक्षेघटादितत्सत्वंवाएहतिकिंत्वधिष्ठानत्वेनघटाद्यनुगतंसन्मात्रांतथाचप्रत्यक्षमपिसद्रूपब्रह्मादेतासिद्ध्यनुकूलमेवेत्यासतिसत्सदियप्रत्यक्षस्यान्नतुघटःसन्नित्यादिप्रत्यक्षंइंद्रियान्वयव्यतिरेकानुविधायीतिचेन्नयथाभ्रमेधिदमंशस्याधिष्ठानस्यप्रत्यक्षेणग्रहणमिंद्रियान्वयव्यतिरेकयोस्तत्रैवोपक्षयः।रजतांशस्यारोपितस्यभ्रांत्या

एवादौ पुरुषत्वादिसंशयस्तत्रापितद्व्यतिरिक्तेभ्योभेदोसंदिग्धा विपर्यस्तत्वात्पु
काशतएव। भेदस्यचप्रतियोगिसहोपलंभनियमवतोनप्रत्यक्षेणग्रहणंसंभवति
देशकालव्यवधानेनासन्निकृष्टानामपिप्रतियोगिनांसंभवात्। भेदज्ञानंघटति
योग्यंशेसंस्कारापेक्षणात्स्मृतिरूपमस्तुप्रत्यभिज्ञानमिवतत्तांशइतिचेत्न-
तथापिभेदगतप्रतियोगिविशिष्यांशेतदभावात्। तच्चकनकाचलोभेदप्रति
योगीवस्त्वादितिभेदप्रतियोगिविशिष्यगोचरानुमित्यातत्संस्कारसंभवः। भेद
ज्ञानंविनानुमानप्रवृत्त्ययोगेनात्माश्रयापत्तेः। यत्सत्साध्यहेतुपक्षतायभेदभ्रमेस
तिसिद्धसाधनादिनानुमानाप्रवृत्यातद्भेदज्ञानंविघटतीयस्यतद्भेदज्ञानस्यापे
क्षेनत्वात्। अस्तुतर्हिभेदांशएवप्रतियोगिविशिष्यांशेपिप्रत्यक्षत्वमितिचेत्न
प्रतियोगिनोप्रत्यक्षत्वेतद्देशिष्यप्रत्यक्षायोगात्। संबंधिद्वयप्रत्यक्षंविनासंबंधप्र
त्यक्षासंभवात्। तस्मात्प्रत्यक्षायोग्यस्यप्रतियोगिनाभ्रांतिरूपःप्रतिभासइतितदेकवि



त्तिवेद्यत्वनियतस्यभेदस्यभेदैकवित्तिवेद्यत्वनियतघटादेश्चभ्रमैकविषयत्वात्त्व
त्यक्षंनिर्विशेषसन्मात्रग्राह्यहेतसिद्ध्यनुकूलमिति। न्यायसुधाकृतस्त्वाहुः घटयदे
रैंद्रियकत्वेपिसन्घटइत्यादिरविशिष्टसत्तानुवेधइतिनविरोधः। एवंनीलोघट
इत्यादिरविशिष्टनेत्यादयनुवेधः किंनस्यादितिवितनाश्रुत्यासहृदस्पवस्तुनो
जगदुपादानत्वमुक्तमविरोधात्सर्वसंमतमितितदनुवेधेनैवसन्घटइत्यादि प्र
तिभासोपपत्तौघटादावपिसत्ताकल्पनेगौरवात्तस्परूपादिहीनत्वादेत्यादिकंघटा
दावेवकल्पनीयमितिवेत्यादिति। संक्षेपशारीरकाचार्यास्त्वाहुः प्रत्यक्षस्यघटादि
सत्तयाहित्वेपियच्चिषयस्यप्रसादेसत्येवेदकत्वलक्षणप्रमाणप्रभावान्नतद्विरो
धेनादैतश्रुत्यादिवाधशंका। अज्ञातबोधकंहिप्रमाणंनत्वप्रत्यक्षादिविषयस्प
घटादेरज्ञातत्वमस्तिजडेनावरणाकृत्याभावेनाज्ञानविषयत्वानुपगमात्। स्वप्र

काशतयाघ्रसत्कप्रकाशंब्रह्मैवाज्ञानविषयइतितद्बोधकमेवतत्त्वावेदकंप्रमाणं तदेवप्रमितिविषयः।अतएवश्रुतिरप्यात्मावारेद्रष्टव्यइत्यात्मनएवप्रमेयत्वमिति नियच्छति।नहिद्रष्टव्यइत्यनेनदर्शनंविधीयतेप्रमाणयत्तंत्रस्यविध्यगोचरत्वात्।किंत्वात्मादर्शनाहंइतिअज्ञातत्वादात्मनएवप्रमेयत्वमुपवर्तनान्यस्यति नियम्यतइति।केचित्तुयटादिसत्त्वयाहिणाःप्रत्यक्षस्यप्रामाण्यंब्रह्मप्रमाणान्यून तावगमेपितद्ग्राह्यंसत्त्वमनुगतप्रत्ययोल्लेखाजातिरूपंवाइहेदानींघटास्तीतिय कालसंबंधप्रतीतेस्तद्देशकालसंबंधरूपंवानास्तिघटइतिस्वरूपनिषेधप्रतीते घटादिस्वरूपरूपंवापर्यवस्यतितच्चमिथ्यात्वेननविरुध्यते।नहिमिथ्यात्ववादिना पिशाचादेःस्वरूपंवातस्यदेशकालसंबंधोवातत्रजात्यादिकंवानाम्नुमगम्यतेकिं तुतेषामबाध्यत्वं।नचाबाध्यत्वमेवसत्यत्वंप्रत्ययाद्यमस्तितिवाच्यं।कालत्र येपिनास्यबाधइतिवर्त्तमानमात्रयाहिणाप्रत्यक्षेणग्रहीतुमशक्यत्वादित्याहुः ॥५३॥ राम

---

अन्येत्वबाध्यत्वरूपसत्यत्वस्यप्रत्यक्षग्राह्यत्वेपिप्राणोवेसत्यंतेषमेवसत्य मितिश्रुत्याप्रधानभूतप्राणग्रहणेपरक्षितस्यरुत्स्नस्यप्रपंचस्यब्रह्मणश्च सत्यत्वोत्कर्षापकर्षप्रतीतेःसत्यत्वेचाबाध्यत्वरूपेसर्वदेवाबाध्यत्वंकेचित्का लमबाध्यत्वमित्येवंविधोत्कर्षापकर्षविनाशजराजीमन्मथमन्मथघइत्या दिशब्दतात्पर्यगोचरनियंतृत्वसौंदर्यादीनामिवभूयोविषयत्वात्यविषयत्वादि रूपोत्कर्षापकर्षासंभवाद्धितरेणतत्संभवेपिप्रपंचस्यब्रह्मज्ञानबाध्यत्व श्रुत्यंतरैकार्थ्यादुक्तोत्कर्षापकर्षएवपर्यवसानाच्चप्रत्यक्षग्राह्यंघटादि सत्यत्वंयावद्ब्रह्मज्ञानमबाध्यत्वरूपमितिन्नमिथ्यात्वश्रुतिर्विरोधइत्या हुः।अपरेतुप्रपंचस्यसत्यत्वमिथ्यात्वग्राहिणोःश्रुतिप्रत्यक्षयोर्विरोधेपिदो षशंकाकलंकितात्यथमप्रवृत्तात्प्रत्यक्षात्त्रिदोषत्वादयंछेदन्यायेनपरत्वा च्छ्रुतिरेवबलीयसी।प्राबल्यमागमस्यैवजात्यातेषुत्रिषुस्मृतमितिस्मरणाच्च।

नचवेदैकगम्यार्थविषयकमिदंस्मरणं।तत्रप्रत्यक्षविरोधशंकाऽभावेनशंकि
तप्रत्यक्षविरोधएववेदाधर्वेदस्यप्राबल्योक्तौचित्यात्।तत्रवदृश्यतेव्योम
रूपंद्योतोहव्यवाडिव।नतत्संविद्यतेव्याप्तिनरूपंद्योतोहुताशनः।तस्मात्प्रत्य
क्षदृष्टेपियुक्तमर्थेपरिशिष्टुं।परास्यज्ञायपन्नर्थान्नधर्मात्परिहीयतइतिना
रदस्मृतौसाक्षिप्रकरणेप्रत्यक्षदृष्टस्यापिप्रत्यक्षमविश्वस्यप्रमाणोपदेश
दिभिःपरीक्षणीयत्वप्रतिपादनाच्च।नहिनभोनैल्यंप्रत्यक्षंनभसःशब्दादिषु
पंचसुशब्दैकगुणत्वंप्रतिपादकागमोपदेशमंतरेणप्रत्यक्षादिनाशक्यम
यवदितुं।नचनभसिसमीपेनैल्यानुपलंभान्नदूरेतद्दोषजन्येतिनि
श्चयेनतद्बाधः।दूरेनैल्यदर्शनात्समीपेतदनुपलंभस्तुहिनावगुंठनानुप
लंभवत्समीपदोषजन्यइत्यपिसंभवात्।अनुभववसान्नभोनैल्यमव्याप्य
वृत्तीत्कर्षपपत्तेश्चानापिदूरस्थस्यपुंसोयत्रभ्रूसंनिहितेनभःप्रदेशेनैल्यधीस्व



त्रैवसमीपगतस्यतस्यानैल्यबुद्धेरभावप्रत्यक्षेणबाधः।उपरिस्थितस्यैवनैल्य
स्याभ्रनिक्षत्रादिरिवदूरत्वदोषात्भ्रूसंनिधानावभासइत्यपपत्तेः।पृथिव्या
दिषुसंकीर्णतयाप्रतीयमानानांगंधादीनामुपलभ्यासुचिकुंथकेचिद्भूपुरने
षुणाःपृथिव्यामेवतंविद्यादयोवायुंवसंश्रितमित्यादिभिरागमैरवधार्यवस्था
यावक्तव्यत्वेनप्रत्यक्षादागमप्रावन्यस्यनिर्विशंकत्वाच्च।नह्याज्ञानसिद्धंजलो
पृथ्वंभादिगतंगंधादिपृथिवीगुणादिरागंद्रवत्वंजलादिगुणाइत्यादिरूपेणास्मदा
दिभिःप्रत्यक्षेणशक्यंविवेचयितुं।पृथिव्यादीनांप्रायःपरस्परसंसृष्टतयान्यगु
णास्यान्यत्रावभासःसंभाव्यतइतिशंकितदोषंप्रत्यक्षमस्तिभातिप्रियंरूपंनाम
चेत्यंशपंचकंत्रयंत्रयंत्रयंजगदूपंतदुभयमितिदृष्टांतप्रकारेणागमेन
व्यवस्थाप्यतामितितुल्यं।नचैवमुपजीव्यविरोधःआगमप्रमाणेनवर्णयिदवाक्या
दिस्वरूपांशप्रत्यक्षमुपजीव्यानुपजीव्यतत्सत्यत्वांशोयमदनादित्याकुः।नन्वाग

मस्यप्रत्यक्षाद्बलीयस्त्वेयजमानःप्रस्तरइत्यत्रप्रत्यक्षाविरोधायजमानशब्दस्यत्र
स्तरेगौणवृत्तिर्नकल्पनीया।तथासोमेनयजेतेत्यत्रवैयधिकरण्येनान्वयेयागइष्ट
साधनत्वंसोमवतायोगसाधनत्वंचबोधनीयमितिव्यापारभेदेनवाक्यभेदापत्तेः
सामानाधिकरण्येनान्वयेवक्तव्येप्रत्यक्षाविरोधायसोमवतायागेनेतिमत्वर्थलक्ष
णानकल्पनीयाऽभयत्रापिसत्यपिप्रत्यक्षविरोधेतदनादृत्यागमेनबलीयसाप्रस्तरे
यजमानभेदस्ययागेसोमाभेदस्यचसिद्धिसंभवादितिचेत्।अत्रोक्तंभाम[illegible]तीनिर्वचता
त्पर्यवतीश्रुतिःप्रत्यक्षाद्बलवतीनश्रुतिमात्रंमंत्रार्थवादानांस्मृतिस्तुतिद्वारभूतेर्थ
वाक्यार्थद्वारभूतेपदार्थइवनतात्पर्यं।तात्पर्यंचभावेमानांतराविरुद्धदेवताविग्रहा
दिकल्पनेभ्यःसिध्येत्तात्पर्यवत्येवशब्दस्यप्रामाण्यनियमादितिचत्।न।एतस्मेवरव
तीषुवारवंतायमग्नीषोमसामकृत्वापशुकामोऽग्नयेनयजेतेतिविशिष्टविधेस्तात्पर्यागो
चरेविशेषणस्वरूपेप्रामाण्यदर्शनेनोक्तनियमासिद्धेः।अत्रहिरेवतीस्तोभाधारंवारवं ॥५५॥

तीयंसामविशेषणंनचैतत्सोमादिविशेषणावगोकसिद्धंयेनतद्विशिष्टयागविधिमा
त्रेणप्रामाण्यंवाक्यस्यस्यात्।नापिविशिष्टविधिनाविशेषणाक्षेपः।आक्षेपादिशेषणप्रति
यत्नोविशिष्टगोचरोविधिरस्मिन्नस्तीतेनविशेषणाक्षेपइतिपरस्पराश्रयापत्तेः।अतो
ऽतोविशिष्टविधिपरस्यैववाक्यस्यविशेषणस्वरूपेपिप्रामाण्यंवक्तव्यं।अथचतत्रना
तात्पर्यं।उभयत्रतात्पर्यंवाक्यभेदापत्तेः।एवमर्थवादानामपिविधेयस्तुतिपराणांस्तुति
द्वारभूतेर्थेनतात्पर्यमितितेभ्यःप्रत्यक्षस्यैवबलवत्त्वात्तदविरोधायतेषुद्रव्यंतरकल्प
नेसोमेनयजेतत्यत्रविशिष्टविधिपरेवाक्येसोमद्रव्याभिन्नयागरूपविशिष्टविधेयमि
त्युपरामेतस्यविधेयस्यदध्नाजुहोतीत्यादौविधेयस्यदध्यादिरवगोकसिद्धत्वाभावेन
विधिपराद्वाक्यादेवरवेत्याधारवारवंतीयादिविशेषणस्यैवविनातात्पर्यसिद्धिरेत्यान
नात्पर्यरहितादागमाद्यागसोमवतोभेदग्राहिप्रत्यक्षविरुद्धार्थःसिध्यतीतितत्रापि
तदविरोधायमत्वर्थलक्षणाश्रयणं।अहैतश्रुतिस्तूपक्रमोपसंहारैकरूप्यादिषड्विधा

स्त्रिंगामितादेततात्पर्यात्प्रत्यक्षाद्बलवतीतितत:प्रत्यक्षस्यैवबोध:नतुतद्विरोधायश्रु
तेरन्यथानयनमितिविवरणावार्त्तिकेतुप्रतिपादितंनतात्पर्यवत्त्वेनश्रुतेःप्रत्यक्षात्बाध
त्यंक्षस्तत्रश्रयेयदितिविधेःश्रयणास्यस्तुस्तावार्थत्वप्रतिपादनेतात्पर्यपिरुस्तुतेरू
परसपरात्रिश्राउर्भावपर्यंतमुख्यश्रवणासंबंध:प्रत्यक्षविरुद्धइतितद्विरोधा
यश्रयणशब्दस्योस्मीकरणामात्रेलक्षणाश्रुपगमात्तत्त्वमसिवाक्यस्यजीवब्रह्मा
भेदप्रतिपादनेतात्पर्यंपितन्नदस्यत्वपदवाच्याभेद:प्रत्यक्षविरुद्धइतितद्विरोधाय
निरूढस्चैतन्यलक्षणाश्रुपगमाच्चार्थवादानामपिप्रयाजाद्यंगविधिवाक्यानामिव
स्वार्थेप्रमितावनन्यार्थतयाप्रमितानामेवार्थानांप्रयोजनत्वशादन्यार्थतितिप्रयाजादि
वाक्यदत्तेषामप्यवांतरसंसर्गेतात्पर्यमस्त्येवदाक्येकवाक्यत्वात्तत्पदैकवाक्यतामापे
वपरमवांतरतात्पर्यानुश्रुपगमादितिविवरणाचार्यैर्न्यायनिर्णयेव्यवस्थापनेननयजमा
न:प्रस्तरइत्यादीनामपिमुख्यार्थतात्पर्यंयत्रक्वोप्रत्यक्षाविरोधायेवलक्षणाश्रुपगमा



---

च्चा।कथंतर्हिश्रुतेःप्राबल्यं।उच्यतेनिर्दोषत्वात्परत्वाच्चश्रुतिमात्रंप्रत्यक्षात्प्रबलमिति
त्सर्गःकिंतुश्रुतिवाधितमपिप्रत्यक्षंकथंचितंविषयोपहारेणसंभावनीयंनिर्विषयत्वा
नायोगात्।अतएवाद्वैतश्रुतिविरोधेनतत्त्वाविदनात्मत्वाविषयप्रत्यक्षमर्थक्रियास
मर्थत्वाव्यावहारिकविषयसमर्पणेनोपपद्यते।किंबहुनानेदंरजतमितिसर्वोहप्र
त्यक्षवाधितमपिशुक्तिरजतंप्रत्यक्षमनुभवाविरोधात्पुरोदेशेशुक्तिसंपिन्नरज
तोपगमेनसमर्थ्यतेननुतद्विरोधेनव्यवहितमातरमसदेवचारजतंविषयइति
कल्प्यते।एवंवप्रस्तरेयजमानभेदयाहिणोयावद्ब्रह्मज्ञानमर्थक्रियासेवादेनानुव
र्त्तमानस्यप्रत्यक्षस्यप्रातिभासिकविषयत्वाभ्युपगमेनोपपादनायोगाद्यजमानःप्रस्त
रइतिश्रुतिवाध्यत्वेसर्वथानिर्विषयत्वंस्यादितितत्परिहारायोत्सर्गमयाद्यश्रुतिरेव
नस्त्वंपदाधिकरणादिप्रतिपादितप्रकारेणान्यथानीयते।नचैतश्रुतिप्रत्यक्षयो
रिवेहश्रुतिप्रत्यक्षयोस्तात्विकव्यावहारिकविषयोपगमेनप्रत्यक्षोपपादनेकश्चिदो

ब्रह्मातिरिक्तसकलमिथ्यात्वप्रतिपादकषड्विधतात्पर्यलिंगोपपन्नानेकश्रुतिवि
रुद्धैनैकेनार्थवादेनप्रस्तरेयजमानतादात्म्यस्तावकस्यप्रतिपादनासंभवात्॥
एवंतत्त्वमसिवाक्येनत्वंपदवाच्यस्यसर्वज्ञत्वाभोक्तृत्वादिविशिष्टब्रह्मरूपत्वबोध
नेतत्रासर्वज्ञत्वभोक्तृत्वादिप्रत्यक्षमत्यंतनिराकरोतीनस्यादितितत्परिहारायहंका
रशब्दवाच्यस्यभोक्तृत्वादितोनिरूपस्यशुद्धस्योदासीनब्रह्मरूपत्वमितिव्यवस्था
माश्रित्यभागत्यागलक्षणाश्रीपतेरेवंस्वमलंश्रयेदित्यादावपिप्रत्यक्षस्यात्यंतनि
र्विषयत्वप्रसक्तेस्तत्परिहायश्रुतेर्लक्षणा।नेहनास्तिकिंचनेयत्रप्रत्यक्षस्यकथंचिद्वि
षयोपपादनसंभवेतुनप्रबलायाःश्रुतेरन्यथानयनमितिनकश्चिद्व्यवस्थाप्रसंगः
॥अथदाक्षसत्रंश्रयेत्सोमेनयजेतेत्यादौनप्रत्यक्षानुरोधेनलक्षणाश्रयणंकिंत्व
नुष्णानाशक्त्यानहिकक्षस्त्रेऽस्त्रीकरणमात्रमिवमुख्यःपाकोनुष्णेनुशक्यतेनवा
सोमइव्यकरणकोयागइवतदग्निकोयागःकेनविदनुष्णेनुशक्यते।नचानुष्णेयत्वाभिम ॥५७॥

---

तस्यप्रत्यक्षविरोधेवानुष्णानाशक्तिरितिशास्त्रांतरेणाव्यवस्थीयतइतिवाच्यं।शशिमंडलं
कर्तिमलकुर्यादितिविधावनुष्णेयत्वाभिमतस्यशशिमंडलेकांतिमत्त्वस्यप्रत्यक्षाविरोधेष्व
नुष्णानाशक्तिदर्शनेनतस्यास्ततोभिन्नत्वात्।तथाचतत्रततएवलक्षणाश्रयणंतस्मादे
यछेदन्यायादिसिद्धस्यश्रुतिबलीयस्त्वस्यनकश्चिद्बाधइति।अथकथमन्यायछेदन्या
यप्रवृत्तिः।उच्यते।यथाज्योतिष्टोमेवह्निप्रवर्तमानंप्रसर्यतामुष्णातुरयछेदेसतियदुष्णा
नायछेदोतादृशिणंयज्ञमिष्णतेनपुनर्यजेतेतिश्रुतिर्निराक्षीन्नजातोष्णात्रयछेदनि
मित्तप्रायश्चित्तकर्तव्यताबुद्धिःपश्चात्प्रतिहन्त्रयछेदेसतियदिप्रतिहन्तीयष्टिद्योतस
वेवृदसदयातिश्रुतिर्निराक्षीन्नजातयातदिरूढप्रतिहन्त्रयछेदनिमित्तप्रायश्चित्त
कर्तव्यताचुद्यावाध्यतएवंपूर्वंघटादिसत्यत्वप्रत्यक्षंयदयात्।नेमंध्यात्वश्रुतिजन्यबु
द्धावाध्यते।नचोदाहृतस्थलेष्वनैमित्तिककर्तव्यताबुद्धेःपरंनैमित्तिककर्तव्यताबुद्धावा
धेपिष्वनैमित्तिककर्तव्यसाबुद्धिर्नकंशास्त्रंयत्रोज्ञातमात्रायछेदउभयोरपियोगय

दृयछेदोवाऽङ्गात्रयछेदकस्यपरत्वंवातत्रसावकाशंप्रत्यक्षंत्वहेतुरुक्त्यावाधेविष
यांतरभावान्निरालंबनंस्यादितिविषम्यंशंकनीयं। तत्रघृतादौस्मृतिबाध्यंप्रत्यक्षं
प्रवर्त्ततेतत्रैवव्यावहारिकंविषयंलबाधतार्थस्यतस्य परायछेदस्यतेसर्वथाबाधि
तस्यपूर्वायछेदशास्त्रस्यैवविषयांतरान्वेषणाभावादितापिसर्वप्रत्ययवेद्यब्रह्मस
त्तायांसावकाशंप्रत्यक्षमितिवक्तुंशक्यत्वाच्च।यत्त्वेकस्मिन्नपित्रयोगेक्रमिकाभ्यांनिमित्ता
भ्यांक्रतौतत्तन्नैमित्तिककर्त्तव्यतयोःबदरफलेश्यामरक्तरूपयोरिवक्रमेणोत्पादादुप
त्तानद्वयवत्कर्त्तव्यताज्ञानद्वयमितिप्रमाणमेवेतिनपरेणापूर्वज्ञानबाधेयछेदन्यायउदा
हरणं। अतएवापछेदाधिकारेणैनैमित्तिकशास्त्रस्यायमर्थःनिमित्तोपजननात्प्राग्न्य
थाकर्त्तव्योपिक्रतुर्निमित्तेसत्यनाथाकर्त्तव्यइतिशास्त्रदीपिकावचनमितितन्नांगस्यसतः
कर्त्तव्यत्वेनवप्रयाजाविप्रतिहर्त्रर्थछेदवतिक्रतौपूर्वंतेनाङ्गात्रयछेदनैमित्तिकस्य प्रायश्चि
त्तस्यांगत्वमस्तिआहवनीयशास्त्रस्यपदहोमादिरिक्तहोमविषयत्ववद्युङ्गातप



घं

छिद्येतेतिशास्त्रसप्रयाजाविप्रतिहर्त्रर्थछेदरहितक्रतुविषयत्वात्तेनहिन्या
यरत्नमालायांसाधारणस्यशास्त्रस्यविरोधविषयादितासंकोचःरुक्तरूप
स्यप्राप्तबाधोभाधीयतइत्युक्तलक्षणप्राप्तबाधविवेचनेतत्रैवंसतिशास्त्रार्थोभव
तिप्रयाजाद्युङ्गात्रयछेदविधरप्रतिहर्त्रर्थछेदवतःक्रतोःसर्ववेदसदानमंगएवं
उङ्गात्रयछेदेपिद्रष्टव्यमितियत्तुशास्त्रदीपिकावचनमुदाहृतंतदपितेनोत्पन्नम
पिपूर्वप्रायश्चित्तज्ञानमिथ्याभवतिवाधितत्वात्तउत्तरस्यनकिंचिद्बाधकमस्तीति
पूर्वैकर्त्तव्यताबाध्यत्वप्रतिपादकग्रंथोपसंहारेपठितत्वान्नैमित्तोपजननात्प्राङ्नै
त्तोपजननंविनानिमित्तोपजननाभावेसत्यन्यथाकर्त्तव्योपीतिलक्षणचिंतामात्रयरं
।नतूत्तरनिमित्तोपजननात्प्राक्पूर्वनैमित्तिककर्त्तव्यतावस्कृतग्रासादित्येवंप
रं।पूर्वग्रंथसंदर्भविरोधापत्तेः।आस्तामीमांसकमर्यादाश्यामरक्तरूपन्यायेनक्र
मिककर्त्तव्यतायोत्यन्तापगमेकोविरोधः।उच्यतेकिंतत्कर्त्तव्यत्वंयत्परनैमित्तिकक्र

र्त्तव्यतोत्पत्त्यानिवर्त्ततेऽनताक्पूर्वनैमित्तिकस्यस्कृतिसाध्यत्वयोग्यत्वंतस्यपश्चाद
प्यनपायात्।नापिफलमुखेकृतिसाध्यत्वंतस्यपूर्वमप्युजननात्।नापियदननुष्ठा
नेक्रतोर्विकल्प्यंतत्वमंगत्वंवाऽननुष्ठानेक्रतुवैकल्यप्रयोजकत्वस्यनियमविशेष
रूपत्वेनकर्मांगत्वस्यफलोपकारितयासंनिपातितयावाकारणत्वविशेषरूपत्वेनच
तयोःकादाचित्कत्वायोगेनस्वाभाविकत्वनिर्वाहापपत्त्याऽविरुद्धापछेदाभाववतः
क्रतोःपूर्वापछेदनैमित्तिकमंगंतत्रैवतदननुष्ठानेक्रतुवैकल्यप्रयोजकमितिवि
शेषणीयतयाप्राप्त्यापछेदचतिक्रतोःपूर्वापछेदनैमित्तिकेक्रत्वंगत्वस्यतदननु
ष्ठानेक्रतुवैकल्यप्रयोजकत्वस्यवाप्राप्त्यापछेदोत्पत्तेःपूर्वसंभवात्।नहिक्षु
किंचिदस्त्वंतरंप्रतिकंचित्कालंव्याप्यंपश्चान्नेतिवाकंचित्कालंकारणेपश्चान्नेति
वाकचिदृष्टंयुक्तंवा।नापिकर्त्तव्यत्वंनामधर्मांतरमेवागमापापयोग्यंकल्पनीयंमा
नाभावात्।विरुद्धापछेदशास्त्रयोःपदार्हवनीयशास्त्रवद्व्यवस्थोपपत्तेःतस्मान्निराल



बनंक्रमिककर्त्तव्यतादयोत्पत्तिचक्षुःननुचोपक्रमाधिकरणन्यायेनासंजात
विरोधित्वात्प्रत्यक्षमेवागमाद्बलीयःकिंनस्यात्।उच्यतेत्रैकवाक्यताप्रतीयतेतत्रै
कस्मिन्नर्थपर्यवसानेनभाव्यंअर्थभेदेप्रतीतैकवाक्यतामंगप्रसंगात्।अतस्तत्रप्र
थममेसंजातपतिपक्षेणाग्नजापतिर्वरुणायाश्वमनयदित्याद्युपक्रमेणापरस्तुतिस
रूपार्थवादेनदानुरिष्टेबुद्धिमधिरोपितायांतद्विरुद्धार्थपावतोश्वान्प्रतिग्रहीया
त्रावतोवारुणश्चतुष्कपालस्त्रिर्वपेदित्यपसंहारगतंपदजातमुपसंजातपति
पक्षत्वाद्यथाश्रुतार्थसमर्पणेनतदेकवाक्यतामप्रतिपद्यमानंस्वैकवाक्यतानि
र्वाहापरिजिहीर्षमतर्भाव्यतदानुगुण्येनैवात्मानंलभतइतिउपक्रमस्यप्राबल्याय
त्रतुपरस्परमेकवाक्यतानप्रतीयेतेतत्रपूर्वदृत्तमवगणय्यलब्धात्मकंविरुद्धार्थ
कंवाक्यंस्वार्थबोधयत्येवेतिनतत्रपूर्वदृत्तस्यप्राबल्यं।अतएवषोडशिग्रहवाक्य
पूर्वदृत्तमवगणय्यतदग्रहवाक्यस्यापिस्वार्थबोधकत्वमुपेयतोकिंतत्रयोर्विष

यांतराभावादगत्यातत्रैवविकल्पानुष्ठानमिष्यते।एवंचाहेतागमस्यप्रत्यक्षेतोक
वाक्यताशंकाऽभावात्पूर्वत्रत्नमपितदविगणापस्वार्थबोधकत्वमप्रतिहतंतदर्थ
बोधजननेचपूर्वपरमज्ञातत्वादवाधित्वेवजायते।परस्यानन्यथोत्पादान्नाद्यावा
धेनसंभवइत्यपघेदन्यायस्यैवप्रवृत्तिर्नोपक्रमन्यायस्य।अतएवलोकेपिप्र
थमप्रवृत्तंशुक्तिरूप्यप्रत्यक्षमाप्तोपदेशेनवाध्यतइति।ननुतथापुपजीव्यत्वे
नप्रत्यक्षस्यप्राबल्यंदुर्वारंअपघेदशास्त्रयोर्हिनपूर्वंपरस्योपजीव्यमितियुक्तः
परेणपूर्वस्यबाधःइहनुवर्णपदादिस्वरूपयाहकतयामिथ्यात्वबोधकमाग
मंप्रतिप्रत्यक्षस्योपजीव्यत्वादागमस्यैवतद्विरुद्धेमिथ्यात्वबोधकत्वरूपोवा
धोयुज्यते।नचमिथ्यत्वश्रुत्यावर्णपदादिसत्यत्वांशोपमर्देपुपजीव्यस्वरूपांशो
पमर्दोभावान्नोपजीव्यविरोधइतिवाच्यंनेहनानास्तिकिंचनेत्यादिश्रुतिभिःस्व
रूपेणैवप्रपंचाभावबोधनात्।अत्रकेचिदाहुःदृषमानयेत्यादिवाक्यंश्रवणादीक्षा



त्वदृषमानयेत्यादिरूपेणाश्रुतदृतोशादृषमितिदर्शनेनशाद्यमितोवर्णपदादि
प्रत्यक्षेयमाश्रमसाधारणमेवापेक्षितमित्यहेतागमेनवर्णयदादिप्रत्यक्षमात्र
मुपजीव्यस्वरूपोद्यमंदेयेनोपजीव्यविरोधइति।अन्येत्वाहुःशाद्यमितोवर्णय
दादिस्वरूपसिध्यनयेक्षायामपिक्षायामपिश्रयोग्यशक्षात्वमित्यनुद्योग्यतास्व
रूपसिध्यपेक्षास्तितदपेक्षायामपिनोपजीव्यविरोधः।नेहनानास्तीतिश्रुत्यानिषेधेपि
यावद्ब्रह्मज्ञानमनुवर्त्तमानस्यार्थक्रियासंवादिनोऽसद्विलक्षणस्यप्र[illegible]स्वरूपस्यां
गीकारात्।अन्यथाप्रत्यक्षादीनांव्यावहारिकप्रमाणानांनिर्विषयत्वप्रसंगात्।नच
स्वरूपेणनिषेधेकर्यप्रपंचस्वरूपस्यात्मनाभःनिषेधस्यप्रतियोग्यप्रतिक्षेपरूपत्वे
निषेधत्वेव्याघातादितिवाच्यं।शुक्तावपादंरजतंनेदंरजतमितिप्रतातिहयानुरोधे
नुरोधेनाधिष्ठानगताध्यस्ताभावस्यबाधपर्यंतानुवृत्तिकासद्विलक्षणाप्रतियोगिरू
पसहिष्णुत्वाभ्युपगमात्।एतेनप्रपंचस्यस्वरूपेणनिषेधेशशशृंगवदसत्वमेवस्यादि

तिनिरस्तं।ब्रह्मज्ञाननिवर्त्यस्वरूपांगीकारेणवेषम्यात्।।नवास्पध्यास्तस्याधिष्ठानस्वरू
पेणानिषेधेऽन्यत्रतस्यस्वरूपेणानिषेधःस्वतःसिद्धइतितस्यसर्वदेशकालसंबंधिनि
षेधप्रतियोगित्वायोऽसत्वंदुर्वारंसर्वदेशकालसंबंधिनिषेधप्रतियोगित्वमसत्त्वमित्ये
वासत्वनिर्वचनान्नविधांतरेणतन्निर्वचनायोगादितिवाच्यं।यमसतःसर्वदेशकालसं
बंधिनिषेधप्रतियोगित्वमुपगच्छतातस्यतथात्वेप्रत्यक्षस्यसर्वदेशकालयोःप्रत्यक्षा
करणायोगेनागमस्यतादृशागमानुपपत्तेश्चनप्रमाणयितुमशक्यतयानुमानमेवप्रमा
णमितव्यमितितदनुमानेयत्साध्यत्वंलिंगंवाच्यंतस्यैवप्रथमप्रतीतस्यासत्वनिर्वचन
नीययत्तेरित्याहुः।।अपरेतुनेहनानास्तीत्यादिश्रुतेःसत्यत्वेनप्रपंचनिषेधएवतात्पर्य
मस्वरूपेणानिषेधस्यस्वरूपाप्रतिक्षेपकत्वेतस्यतन्निषेधत्वायोगात्।तत्प्रतिक्षेपक
त्वेप्रत्यक्षविरोधात्तनचसत्यत्वस्यापिसन्घटइत्यादिप्रत्यसिद्धत्वान्नतेनाप्रिरूपेणानि
षेधोयुक्तइतिवाच्यं।प्रत्यक्षस्यश्रुत्यविरोधायसत्यत्वाभासरूपव्यावहारिकसत्यत्व



विषयत्वोपपत्तेः।।नचैवंसतिपारमार्थिकसत्यत्वस्यब्रह्मगतस्यप्रपंचेप्रसक्त्यभावात्ते
नरूपेणप्रपंचनिषेधानुपपत्तिःयथाशुक्तौरजताभासप्रतीतिरेवंसत्यरजतप्रसक्ति
रितिनिषेधः।।अतएवनेदंरजतंकिंतुतत्रनेयमदीयागौःकिंतुसैवनात्रवर्त्तमा
नक्षेत्रःकिंत्वपवरकइतिनिषिध्यमानस्यान्यत्रसत्त्वमवगम्यतेएवंसत्यत्वाभासप्र
तीतिरेवसत्यत्वप्रसक्तिरितितन्निषेधोपपत्तेः।।अतावरणाद्यंयोग्यतादिस्वरूपोपमर्द
शंकाऽभावान्नोपजीव्यविरोधइत्याहुः।।अन्येतुब्रह्मणिपारमार्थिकसत्यत्वंप्रपंचेव्याव
हारिकसत्यत्वंसत्यत्वाभासरूपंशुक्तिरजतादौप्रतिभासिकसत्यत्वंतत्तोपिनिकृष्टमिति
सत्तात्रैविध्यंनेयेतेऽधिष्ठानब्रह्मपारमार्थिकसत्तामादायेवद्यावदादौसत्याभिमानापप
त्यासत्वाभासकल्पनस्यनिःप्रमाणकत्वात्।एवंचप्रपंचेसत्वप्रतीत्यभावात्तत्तादात्म्यापन्ने
ब्रह्मणितत्प्रतीतेरेवाधिष्ठानेनप्रपंचेनत्वसक्तित्वोपपत्तेश्चसत्यत्वेनप्रपंचनिषेधेनेयजा
त्यविरोधोनवाऽप्रसक्तनिषेधता।नचब्रह्मगतयापारमार्थिकसत्वातिरेकेणप्रपंचेसत्वाभा

सानुपगमव्यवहितसत्यरजतातिरेकेणाशुक्तौ रजताभासोत्पत्तिः किमित्यपेपतइति
वाच्यं।व्यवहितस्यासंनिकृष्टस्यापरोक्ष्यासंभवात्तन्निर्वाहापतदुपगमात्।दित्याकुः।ननु
वंप्रतिबिंबभ्रमस्थलेपिग्रीवास्थमुखातिरेकेणादर्पणेमुखाभासोत्पत्तिरूपेयास्यात्।स्व
कीयेग्रीवास्थेमुखेनासाद्यच्छिन्नप्रदेशापरोक्ष्यसंभवेपिनयनगोलकललाटादिप्र
देशापरोक्ष्योयोगात्।प्रतिबिंबभ्रमेनयनगोलकादिप्रदेशापरोक्ष्यदर्शनाच्च।नचबिंबाति
रिक्तप्रतिबिंबाभ्युपगमेइष्टापत्तेः।ब्रह्मप्रतिबिंबस्यजीवस्यापितत्तोभेदेनमिथ्यात्व
पत्तेः।अत्रविवरणानुसारिणःप्राहुः।ग्रीवास्थएवमुखेदर्पणोपाधिसान्निध्यदोषाद्द
र्पणस्थत्वप्रत्यग्मुखत्वबिंबभेदानामध्यासःसंभवात्रदर्पणेमुखस्याध्यासःकल्पनीयो
गौरवात्।दर्पणेमुखंनास्तीतिसंसर्गमात्रबाधात्मिथ्यावस्तुतस्तुनेदंमुखमितिस्वरूप
बाधापत्तेःदर्पणेममुखंभातीतिस्वमुखाभेदप्रत्यभिज्ञानाच्च।नचग्रीवास्थमुखस्या
धिष्ठानस्यापरोक्ष्यासंभवःउपाधिप्रतिहतनयनरश्मीनांपराक्त्यबिंबग्राहकत्वनि



यमाभ्युपगमात्।तन्नियमानभ्युपगमेपरमाणोःकुड्यादिव्यवहितस्थूलस्यापिचक्षुषा
प्रतिबिंबभ्रमप्रसंगात्।नचाव्यवहितस्थूलोद्भूतरूपवत एवचाक्षुषप्रतिबिंबभ्रमोना
न्यस्यैवनियमइतिवाच्यं।बिंबस्थोद्भूतरूपयोःकेनचिच्चाक्षुषज्ञानजननेनोपयोग
संभवेविधांतरेणोपयोगकल्पनानुपपत्तेः।कुड्यादिव्यवधानस्यप्रतिहतनयनरश्मि
संबंधविघटनविनैवप्रतिबंधकत्वेतथैवघटप्रत्यक्षादिस्थलेपितस्यप्रतिबंधकत्वसं
भवेनचक्षुःसंनिकर्षमात्रस्यकारणत्वविलोपप्रसंगाच्चदर्पणेमिथ्यामुखाध्यासवादि
नापिकारणत्रयेतर्गतसंस्कारसिद्ध्यर्थंनयनरश्मीनांकदाचित्पराक्त्यस्वमुखग्रा
हकत्वकल्पनयैवपूर्वानुभवस्यसमर्थनीयत्वाच्च।नचनासादिप्रदेशावच्छिन्नदृष्ट्वा
नुभवादेवसंस्कारोपपत्तेःतावतानयनगोलकादिप्रतिबिंबाध्यासानुपपत्तेःतटाक
सलिलेतद्विटपिसमारूढादृष्टवरपुरुषप्रतिबिंबाध्यासस्थलेकथमपिपूर्वोऽनुभवस्पृ

र्वचत्वात्। एवंचोपाधिप्रतिहतनयनरश्मीनांबिंबप्राप्यतद्ग्राहकत्वेवश्यंवक्तव्येफलवद्या
दर्पणाद्यभिहतानामेवबिंबप्राप्यतद्ग्राहकत्वंनशिलादिप्रतिहतानामनातस्वच्छताद्यादि
प्रतिहतानांमलिनोपाधिसंबंधदोषान्मुखसंस्थानविशेषग्राहकत्वंसाक्षात्सूर्यप्रेक्षू
नामिवोपाधिंप्राप्यनिवृत्तानांनतथात्वेतेजसाप्रतिहतिरितिप्रतिबिंबस्यार्थालोकेने
साक्षात्तद्वत्तेजसइवनाशकंजलाद्युपाधिसन्निकर्षेकेनचिद्युपाधिप्रतिहतानांबि
बग्राहकेषांचित्तदंतर्गतसिकतादियहणमित्यादिकल्पनात्कार्श्यनोपहतोऽयं ये
तविद्यात्ततस्तत्प्रतिबिंबस्यमिथ्यात्वमभ्युपगच्छतोत्रिविधजीववादिनोविधारणगुरु
प्रभृतीनामेवमेवापिप्रापमाकुः॥वैत्रमुखाङ्कितमदर्शतलंनचपार्श्वस्थितैःस्पष्टंनिरी
क्ष्यमाणंदर्पणेतत्प्रतिबिंबंततोभिन्नंस्वरूपतोमिथ्येवस्वकरगतादिवरजाताशुक्तिरज
तंनचदर्पणेमममुखंभातीतिबिंबाभेदज्ञानविरोधःस्पष्टभेदहित्वप्रत्यक्षमुखत्वादिज्ञा
नविरोधेनाभेदासंभवाद्दर्पणेमेममुखमितिव्यपदस्यस्वछायामुखेस्वमुखव्यपदेशवद्गौ

॥६३

णत्वात्। नचाभेदज्ञानविरोधाद्भेदव्यपदेशएवगौणःकिंनस्यादितिशंक्यंबालानां
प्रतिबिंबेपुरुषांतरभ्रमस्यहानोपपादिन्साध्यर्थक्रियापर्यंतस्यापत्वपिन्दुमराक्षत्वात्।
नचप्रेक्षावतामपिस्वमुखविशेषपरिज्ञानापदर्पणाद्युपादानदर्शनाद्भेदज्ञानमप्य
र्थक्रियापर्यंतमितिवाच्यंभेदेपिप्रतिबिंबस्यबिंबसमानाकारत्वनियमाद्विशेषपरिज्ञाना
देवतदुपादानोपपत्तेः। पत्तुनात्रमुखमितिदर्पणेमुखसंसर्गमात्रस्यवाधोनमुखस्पे
तिनन्वनेदंरजतमित्यत्रापिइदमर्थरजततादात्म्यमात्रस्यवाधोत्तरजतस्येत्यापत्तेः।
पदिचेदमंशेरजतस्यतादात्म्येनाध्यासान्नेदंरजतमितितादात्म्येनरजतस्येववाधो
नतादात्म्यमात्रस्यतदादर्पणेमुखस्यसंसर्गितयाध्यासान्नात्रमुखमितिसंसर्गितया
मुखस्येववाधोनसंसर्गमात्रस्येतिनुल्यं। पत्वधर्मिणेप्यध्यासकल्पनेगौरवमितित
द्रजतामासकल्पनागौरवत्वान्नदोषः। स्वनेत्रगोलकादिप्रतिबिंब
मस्यनेबिंबापरोक्ष्यकल्पनोपपाभावात्। नयनरश्मीनामुपाधिप्रतिहतानांबिंबग्रहि

कल्पनेहिदृष्टविरुद्धंवुपद्यते।कथंहिजलसंनिकर्षेकुकाचिन्नयनरश्मिघृतिह
तमंतर्गाघ्रस्यन्येजलसंबंधेनापिप्रतिहन्यमानानिर्गतमृदवःसकलनयनरश्मिप्र
तिघातिनेकिंरणामसूहविजित्यतन्मध्यगतसूर्यमंडलंप्रविशेयुःकथंचचंद्रादव
लोकनइवतत्प्रतिबिंबावलोकनेपिसंमृतशीततलितहृद्बसन्निकर्षविशेषेला
कनयोःशैत्याभिनव्यत्स्याच्चाप्यायनंस्यात्कथंचजलसंबंधेनापिप्रतिहन्यमानाः
शिलादिसंबंधेननप्रतिहन्येरन्नातस्प्रतिहत्यपराङ्मुखावानयनगोलकादिभिर्नसंस
ज्येरन्नातस्संसर्गेवासंस्पृष्टंनसाक्षात्कारयेयुःदोषेणापिहिविशेषांशग्रहणमात्रंप्रति
बध्यमानंदृश्यतेननुसन्निकृष्टधर्मिस्वरूपमपिप्रतिमुखाध्यासपक्षेतुनकिंचिद्दृष्टवि
रुद्धंकल्पनीयंतद्व्यवहितस्यूर्ध्वोद्भूतरूपस्येवचक्षुषाध्यासदशनाद्विगतस्यो
र्ध्वोद्भूतरूपयोःस्वाश्रयसाक्षात्कारकारणत्वेनतत्कल्पयोःआश्रयप्रतिबिंबाध्यासेपिकारणा
लंकुड्यादावरणद्रव्यस्यत्वगिंद्रियन्यायेनप्राप्यकारितयापगतनयनसन्निकर्षविध



---

ठनद्वाराव्यवहितस्यसाक्षात्कारप्रतिबंधकत्वेनकल्पस्यव्यवहितप्रतिबिंबाध्यासे
पिविनेवद्वारांतरंप्रतिबंधकत्वंचकल्पनीयंतत्रकोविरोधःक्वचित्कारणत्वादिनाकल्प
ल्पस्यफलवत्वादन्यत्रापिकारणत्वादिकल्पनेनैतेनोपाधिप्रतिहतनयनरश्मीनां
बिंबप्राप्त्यनुपगमेव्यवहितस्योद्भूतरूपादिरहितस्यचचाक्षुषप्रतिबिंबजन्यमप्रसंग
इतिनिरस्तं।किंचतदभ्युपगमएवोक्तदूषणप्रसंगःकथंसाक्षात्सूर्यावलोकनइव
विनाचक्षुर्विक्षेपमवनतमौलिनानिरीक्ष्यमाणंसलिलेततःप्रतिहतानांनयनरश्मीनामू
र्ध्वमुल्लिखबिंबसूर्यग्राहकत्ववत्तिर्यक्सुविक्षेपविनाऋजुचक्षुषादर्पणेविलोक्यमाने
तत्प्रतिहतानांपार्श्वस्थमुखग्राहकत्वंचवदनसालोकरणाभावेप्युपाधिप्रतिहतानां
पृष्ठभागव्यवहितग्राहकत्वंतावदुर्वारंउपाधिप्रतिहतनयनरश्मीनानिष्क्रान्तियमंवि
हाययत्रबिंबंतत्रैवगमनोपगमातातघामलिनदर्पणेश्यामतयागौरमुखप्रतिबिंबस्यले
विद्यमानस्यापिबिंबगतगौररूपस्यचाक्षुषत्वानेनुपयोगितयापीतशंखभ्रमन्यायेनगौरो

प्यरूपवैशिष्ट्यनैवप्रतिबिंबमुखस्यापाटवंनिर्वाह्यमितितथैवनीरूपस्यापिदर्प
णेपापिश्यामत्ववैशिष्ट्यनुवाक्षुषप्रतिबिंबत्वमविषयत्वमप्यदुर्वारं। स्वतोनीरूप
स्यापिनभसोध्यस्तनैल्यवैशिष्ट्यनचाक्षुषत्वसंघटितपत्तेः।तस्मात्स्वरूपतः कृतमुख
ध्यासपक्षएवश्रेयोन्नचतत्रापिदृष्टानुभवसंस्कारदोर्घघांपुरुषसामान्यानुभव
संस्कारमात्रेणास्वप्नेप्यदृष्टचरपुरुषाध्यासवन्मुखसामान्यानुभवसंस्कारमात्रेणाद
र्पेमुखविशेषाध्यासोपपत्तेः।स्यांस्तुभेदःस्वप्नेषुशुभाशुभहेत्वदृष्टानुरोधेनपुरुषा
कृतिविशेषाध्यासःइहबिंबसंनिधानानुरोधेनमुखाकृतिविशेषाध्यासइति।नचप्र
तिबिंबस्यस्वरूपतोमिथ्यात्वंब्रह्मप्रतिबिंबस्यजीवस्यापिमिथ्यात्वापत्तिर्दोषःप्रतिबिंब
जीवस्यतद्घात्वेप्यवच्छिन्नजीवस्यसत्यतामुक्तिभाक्त्वोपपत्तेरिति।यत्तुप्रतिबिंबदर्पणा
दिषुमुखछायाविशेषरूपतयासत्यमेवेतिकस्यचिन्मतंतन्न।छायायाहिनाशरीरादेस्तत्र
दर्पणेरालोकेकिंपदेशव्याप्तिर्निरूप्यतत्रदेशेस्वात्मकतमएवानचमौक्तिकमणिकर्णादि

॥६५॥

प्रतिबंबस्यतमोविरुद्धसितत्वोहितादिरूपवत्तमोरूपस्यापाटवंयुक्तं।नवानमोरू
छायारहितनतपनादिप्रतिबिंबस्यतथात्वमुपपत्तेः।ननुतर्हिप्रतिबिंबरूपछायायास्त
मोरूपत्वासंभवेद्व्यंतरत्वमस्तुद्रव्यानतर्भावेतमोवद्द्व्यांतरकल्पनोपपत्तेरिति
चेत्न।किंतद्द्व्यांतरंप्रतीयमानरूपपरिमाणसंस्थानविशेषमुखत्वादिधर्मयुक्तंन
ह्यहितवास्यात्।अंत्येनेतद्द्व्यांतरेणरूपविशेषादिघटेनप्रतिबिंबोपलंभनिर्वाहइ
तिव्यर्थंतत्कल्पनं।अथमेकस्मिन्नस्यपरिमाणोदर्पणेयुगपदसंकीर्णतयाप्रतीयमा
नानांमहापरिमाणानामनेकमुखप्रतिबिंबानांसत्यतानिर्वाहःकथंवानिश्चिद्यावयवानु
स्यूतेदर्पणेतथैवावतिष्ठमानेतदंतर्हन्तुनासिकाद्यनेकनिम्नोन्नतप्रदेशवतोद्व्यांत
रस्योत्पत्तिःकिंचसितपीतरक्तपीताद्यनेकवर्णादिमतःप्रतिबिंबस्योत्पत्तौदर्पणमध्येस
तंसंनिहितंनतादृशंकारणमस्तीयुक्तंचैतदुपाधिमध्यविस्रांतियोग्यपरिमाणाना
मेवप्रतिबिंबानांमहापरिमाणत्वानंतादृशनिम्नोन्नतादिज्ञानंचयुक्तमेव।यथाहुर्दर्प

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

एतद्द्वयवावस्थानाविरोधेनताक्यंतिर्विबोत्पादनसमर्थंवकिंचित्कारणंकल्प्यमि
ति॰तर्हिशुक्तिरजतमपिसत्यमस्तुतत्रापिशुक्तेर्यथाद्रव्यंस्थितायामेवतत्रादात्मा
यन्नरजतोत्पादनसमर्थंकिंचित्कारणंपरिकल्प्यतत्स्परजतस्यदोषत्वाभिमतका
रणासहकृतेंद्रियग्राह्यनियमवर्णनोपपत्तेःकिंशुक्तिरजतमसत्यंप्रतिबिंबःसत्य
र्धजरतीन्यायेनानचतथासतिरजतमितिदृश्यमानायाःशुक्तेरन्योघ्रेपेरजतो
चितद्रव्यभावापत्तिःअनस्तकस्तुरिकादिप्रतिबिंबस्यापिसौरभादिराहित्यवशुक्ति
रजतस्यद्रव्यभावयोग्यतादिराहित्योपपत्तेः।अथोच्येतनेदंरजतंमिथ्येवरजतम
भादिविसर्वसंप्रतिपन्नबाधात्शुक्तिरजतंसत्यमितितर्हिदर्पेमुखनास्तिमिथ्ये
वदर्पेमुखमभादित्यादिसर्वंसिद्धबाधात्प्रतिबिंबमपिनसत्यमित्येवयुक्तंतस्मा
दसंगतःप्रतिबिंबसत्यत्ववादःनन्वमिथ्यात्ववादोयमुक्तःशुक्तिरजतइवकस्यचि
दत्वयव्यतिरेकशानिमित्तःकारणस्याज्ञानस्यनिवर्तकस्यज्ञानस्यचानिरूपणात॥